Digitized by Sarayu Foundation Trust, Delhi and eGangotri

Sanskrit Manuscript (missing pages)-

Title : Shastra texts -Mantras(Shiva - Hari) - Valmiki Ramayan (Bala Kanda Sarga I - Tilaka Tika)

Pdf pages 2-3 : Shastra texts (From Muhurtha Chintamani Tika, Bhagavat Purana and others)





Pdf pages 4-5 : Mantras (Shiva - Hari)





Pdf pages 6-25 : Valmiki Ramayan (Bala Kanda Sarga I) with Tilaka Tika



रामायणम्

तिलकाख्यया व्याख्यया समेतम् ।

बालकाण्डम् ।

प्रथमः सर्गः ।

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् । नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम् ॥

श्रीमद्राघवपादपद्मयुगलं पद्मार्चितं पद्मया
पद्मस्थेन तु पद्मजेन विनुतं पद्माश्रयस्याप्तये ।
यद्वेदैश्च नुतं सुखैकनिलयं सर्वाश्रयं निष्क्रियं
शश्वच्छंकरशंकरं मुहुरहो सन्नौमि तल्लब्धये ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
जयति रघुवंशतिलकः कौसल्याहृदयनन्दनो रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥



इहैहिकान्भोगान्भुक्त्वा प्रेत्य मृत्वा स्वर्गे महीयते । स्वर्गिभिः सत्कृतो मोदत इत्यर्थः । पठन्निति हेतौ शता ॥ ९९ ॥ पठन्निति । द्विजो मुख्यद्विजो ब्राह्मणः पठन्वागृषभत्वं शब्दब्रह्मपारगत्वं प्राप्नुयात् । स्यादिति यद्यर्थे । यदि क्षत्रियस्तदा रामायणं पठन्भूपतित्वमाप्नुयात् । वैश्यः पण्यैः क्रयद्रव्यैः साध्यं मूलाद्विगुणत्रिगुणवृद्ध्यादिरूपं फलं यस्य तत्त्वं प्राप्नुयात् । धनसमृद्धिं प्राप्नुयादिति फलितोऽर्थः । शूद्रोऽपि जनस्त्रैवर्णिकदासः । अत्र शृण्वन्नित्यध्याहारः । महत्त्वं द्विजेतरसर्वप्रजाभ्यः श्रैष्ठ्यं महत्त्वं देहान्ते स्वोपरितनवर्णप्राप्तिलक्षणं च महत्त्वं प्राप्नुयात् । अस्य गायत्र्यर्थप्रतिपादकत्वध्वननाय गायत्र्यादिमाक्षरेणोपक्रम्य यादिति गायत्र्यान्तिमाक्षरेण समापितवान् ॥ १०० ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे प्रथमः सर्गः ॥ १ ॥

Ref :

https://archive.org/details/The.Ramayana.of.Valmiki.with.Tilaka.of.Rama/page/n31/mode/2up?view=theater

CC-0. UP State Museum, Hazratganj. Lucknow

यत्मात्तव्यं अवश्यं भोक्तव्यं दृढकर्मोपार्जितमितियावत् तदन्यथाकर्त्तुं ब्रह्मसाऽपि न शक्तः अर्थाद्यदृढकर्मोपार्जितमन्यथाकर्त्तुं शक्यत इत्यर्थः
मनो निमित्तशकुनादिभिर्दुष्टफले ज्ञाते बोधायनादिविहितेन तच्छान्तिदानादिरूपधर्मेण प्रयत्नेन तन्निवर्त्यते शुभं वर्ध्यते अत एव तेनैवोक्तं सु
क्षितं विलग्नं धर्मोऽर्थसुखाय दंपत्योः अपरीक्षितं विलग्नं नहि देयं पंडितेन दैवविदा अथ योऽम्बुनि धीमज्जति शास्त्रमविज्ञाय वादयादिति ह
तिरपीदमन्याह स्वभावादेव कालोयं शुभाशुभसमन्वितः अनादिनिधनः सर्वो न निर्दोषो न निर्गुणः तस्मान्निर्दोषकालार्थं मुहूर्त्तमधिगच्छ
कालः शुभो गुणैर्युक्तो बलवद्भिः शुभप्रदाः दोषैर्युक्तोऽपि चाप्राणैर्बहुभिर्व्ययहृद्योरिति अतः शुभमुहूर्त्तबलेन पूर्वकर्मार्जितमशुभमपि दैवफलं नि
यंते इत्यवधेयं २ अथ तिथीशानुष्टुभाह तिथीशा इति एते तिथीशाः तिथीनां स्वामिनः वह्निश्चकश्चको ब्रह्मा शेषं स्पष्टं प्रयोजनं तु तत्तद्देवता

तिथीशा वह्निकौ गौरी गणेशोहिर्गुहो रविः शिवो दुर्गांतको विश्वे हरिः कामः शिवः शशी ३ नंदा च भद्रा च जया च रिक्ता पूर्णेति
तिथ्योऽशुभमध्यशस्ताः सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमार्किगुरौ च सिद्धाः ४ नंदा भद्रा नंदिकाख्या जया च रिक्ता भद्रा
पूर्णसंज्ञाऽधमाकोन॥ ११ प्रतिष्ठादि अथ मुहूर्त्तविचारस्य प्रतिज्ञातत्वात् संवत्सरादिकथनं नोक्तं तत एवावधार्यं ३ अथ तिथीनां संज्ञा सफलं

नंदेति प्रतिपदादि पंच तिथयो नंदा भद्रा जया रिक्ता पूर्णा संज्ञाः स्वस्वनामसदृशफलदाः स्युः इति एवं प्रकारेण सर्वाः षष्ठ्यादयस्तेयाः ताः शुक्लपक्षे
शुभमध्यमाशुभफलदाः स्युः असिते कृष्णपक्षे शुभमध्यमाधमाफलदाः स्युः ता एवं नंदादितिथयः शुक्रबुधमंगलशनिगुरुवारेषु सिद्धिकराः स
यथा नंदा शुक्रवारे एवं भद्रा बुधवारे जया भौमे रिक्ता शनौ पूर्णा गुरौ इति ४ अथ सूर्यादिवारेषु यथासंख्यं निषिद्धतिथीन् दग्धनक्षत्राणि च शालि
हनंदेति अर्कादितिल्यपलोपपंचमी अर्कमारभ्य नंदादिकास्तिथयो धमाः स्यात् यथा सूर्यवारे नंदाधमा एवं सोमे भद्रा भौमे नंदा बुधे जया शरो रिक्ता शुक्रे भद्रा

न्नेपिफलवैचित्र्यदर्शनात्कारणांतरं कल्प्यते तद्दैवमिति अत उभयोर्योगे सत्येव फलसिद्धिरिति एतदपि तत्रैव कृषिवृष्टिसमायोगाद्दृश्यंते फल
यः अस्मिन्नर्थे शृणु श्लोकान्द्वैपायनमुखोद्गतान् कृषिः पौरुषं वृष्टिर्दैवं कर्षकः पौरुषेण कृषिं करोति तां दैवं वृष्ट्या साधयति अथ यः कृषिं करोति
दा वृष्ट्या विना न किंचित्फलमाप्नोति यदि पुनः कर्षको बीजं वपति दैवं च वर्षति तदा फलमधिकमुत्पद्यते एवं दैवपुरुषकारयोः समयोर्यत्फल
यो दृश्यते अत्रार्थे श्रीव्यासमुखोद्गता इमे श्लोकाः न विना मानुषं दैवाद्दैवं वा मानुषाद्धि ना नैको निवर्तयत्यर्थमेकारणिरिवानलमिति केचित्तु द्वि
मानुसारिणीति मन्यमानाः प्रयत्नोपि दैवरूप इति कृत्वा दैवमेव फलसिद्धेः कारणमिति वदंति तन्न अनवस्थादोषप्रसंगात् तथाहि प्राक्कर्मोर्जितपौरु
मेव किल दैवशब्देनोच्यते अत्रत्यः प्रयत्नः प्राचीनपौरुषलक्षणेन दैवेन जन्यते तदपि तत्प्राचीनपौरुषजन्यमित्यनवस्था ततः प्रयत्नोपि दैवप्रेरितश्चेत्त
नुपपन्नं ननु बीजांकुरन्यायेनानवस्थादोषो न भविष्यतीति चेत् न नहि बीजांकुरन्यायेन दैवमेव मूलमिति निश्चीयते नापि प्रयत्नः अतः सत्युभययोगे
फलसिद्धिरिति तत्त्वं एवं चेत्तर्हि पूर्वोक्तानां शौनकादिवाक्यानां येन तु यन्मात्रं व्यंतस्य विपाके सुरेशस्य चिवोपि यः साक्षान्म्रियते ... सोपि नराको न्या
कर्तुमित्यादिकानां का गतिः उच्यते दैवं तु दृढकर्मजं चेति द्विविधं तत्र दृढकर्मजस्यावश्यंभावित्वात् ग्रहशांत्यादिरूपेण पूर्वेण प्रयत्नादपि तन्निवा
रयितुं न शक्यते दृढमूलत्वात् प्रबलवाताघातेपि दृढमूलपादपवत् अदृढकर्मजं तु दैवं प्रयत्नेन निवर्त्यं प्रतिशिथिलमूलपादपवत् तथा च जानके
ये धर्मकर्मनिरता विजितेंद्रियाये ये पथ्यभोजनजुषो द्विजदेवभक्ताः लोकेन एव धृतियेकुलशीलवीलांतेषामिदं कथितमायुरुदारधीभिरिति अ
नाभावे तु विपच्यते तथा च तत्रैव पापिष्ठा ये दुराचारा देवब्राह्मणनिंदकाः अपथ्यभोजिनस्तेषामकालमरणं ध्रुवमिति वैद्यकेपि पूर्वजन्मकृतं
पं व्याधिरूपेण बाधते इति सर्वव्याधीनां साधारण्येन कर्मजत्वेपि साध्यासाध्यत्वेन द्वैविध्यं तत्रापि कृच्छ्रोपायः सुखोपायो द्विविधः साध्य उच्यते
असाध्यो द्विविधो ज्ञेयो साध्यो याप्यश्च प्रतिक्रियः साध्या याप्यत्वमायांति याप्याश्चासाध्यतां तथा घ्नंति प्राणानसाध्यास्तु नराणामक्रियावतामित्यादि
नाः चिकित्स्यव्याधेर्दृढमूलत्वमन्येषामदृढकर्ममूलत्वं निश्चीयते अतो दैवस्य दृढादृढभेदेन द्वैविध्यमस्ति अतः शौनकवाक्यानामयमर्थः येन त्विति येन पुरु

श्रीसदाशिवाय नमः ॥ अस्य श्रीशिवपञ्चाक्ष
रमन्त्रस्य वामदेवऋषिः पंक्तिश्छन्दः श्री
सदाशिवो देवता मम चतुर्वर्गसिद्ध्यर्थे श्री
सदाशिवप्रीत्यर्थे जपे विनियोगः ॥ अथ
ऋष्यादिन्यासः शिरसि वामदेवाय ऋ
षये नमः मुखे पंक्तिच्छन्दसे नमः हृदि
सदाशिवाय नमः ॥ अथ करन्यासः ॐ
नं अङ्गुष्ठाभ्यां नमः ॐ मः तर्जनीभ्या
न्नमः ॐ शिं मध्यमाभ्यां नमः ॐ वां
अनामिकाभ्यां नमः ॐ यं कनिष्ठिका
भ्यां नमः ॐ नमः शिवाय करतलकर
पृष्ठाभ्यां नमः अथ हृदयादिन्यासः
ॐ नं हृदयाय नमः ॐ मः शिरसे स्वाहा
ॐ शिं शिखायै वषट् ॐ वां कवचाय
हुं ॐ यं नेत्रत्रयाय वौषट् ॐ नमः
शिवाय अस्त्राय फट् अथ ध्यानं ध्या
येन्नित्यं महेशं रजतगिरिनिभं चारुचं
द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृ
गवराभीतिहस्तं प्रसन्नं पद्मासीनं
समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं
वसानं विश्वाद्यं विश्ववन्द्यं निखिलभ
यहरं पञ्चवक्त्रं त्रिनेत्रम् इति मन्त्रेण
ध्यात्वा मानसोपचारैः संपूज्य अष्टो
त्तरशतादिजपः ॥ शिव शिव शिव शिव ॥

श्रवणार्थं कथितं तदोवाच भोऽस्माभिर्बहून
शास्त्राणि श्रुतानि किमनेन प्रयोजनं भविष्य
ति एवं परोपदेशेऽप्यतीव कुशलाः स्वयं तु निषि
द्धधर्माचरणे वेदविरोधिनः साहसनिपुणा
स्तेऽतीव तुच्छानीचतमाः सर्पः ३ उच्छल
क्षणम् पयोघ्नाः कंदादिकं विहाय निम्बं खा
दन्ति एवं तेऽपि भागवतादिकं विहाय कोक
शास्त्रादिकं शृण्वन्ती सर्पः तेऽप्यतीव नी
चतमाः सर्पः ४ इति श्रोतृलक्षणं समाप्त
मासीत् ॥ ॥ श्लोकः सकलभुवनमध्ये नि
र्धनास्तेऽपि धन्या निवसति हृदि येषां श्री
हरेर्भक्तिरेका हरिरपि निजलोकं सर्व
थातो विहाय प्रविशति हृदि तेषां भक्तिसू
त्रोपबद्धः १

श्री गणेशाय नमः ॥ श्रीमद्राघवपादपद्मयुगलं ब्रह्मार्चितं पद्मया पद्मस्थेनतु
पयत्नेन विनुतं पयाश्रयस्याप्तये ॥ यद्वृन्दे स्वनुतं सुरैकनिलयं सर्वाश्रयं नि
क्लिवंशस्वच्छकुंरशाकुरंमुहुरहो सन्नौमितल्लब्धये ॥१॥ श्रीमद्दुलतदेव
वीजममलं यस्यांकुरश्चिन्मयः काण्डैः सप्तभिरन्वितोऽतिविततो रम्या
लवालोदितः ॥ पत्रैस्सलक्षसहस्रकैः सुविलसच्छाखाशतैः पञ्चभिस्त्वाल
प्राप्तिफलप्रदो विजयते रामायणाख्यस्तरुः ॥२॥ वाल्मीकिगिरिसम्भूता रामा
म्भोनिधिसंगता ॥ श्रीमद्रामायणीगङ्गा पुनाति भुवनत्रयम् ॥३॥ वेदवे
द्ये परे पुंसि जाते दशरथात्मजे ॥ वेदः प्राचेतसादासीत्साक्षाद्रामायणात्म

णा ॥४॥ रामं रामानुजं सीतां भरतं भरतानुजं ॥ सुग्रीवं वायुसूनुं च प्रणमामि
पुनः पुनः ॥५॥ कूजन्तं राम रामेति मधुरं मधुराक्षरं ॥ आरुह्य कविताशाखां
वन्दे वाल्मीकिकोकिलम् ॥६॥ वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः
शृण्वन् रामकथानादं को न याति परां गतिम् ॥७॥ यः पिबन् सततं रामचरि
तामृतसागरम् ॥ अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥८॥ गोष्पदी
कृतवारीशं मशकीकृतराक्षसम् ॥ रामायणमहामालारत्नं वन्देऽनिलात्मज
म् ॥९॥ अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ॥ कपीशमक्षहन्तारं
वन्दे लङ्काभयंकरम् ॥१०॥ उल्लंघ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनका

वा॰रा॰
२

ल्मजायाः॥ऽन्यादयते नैव दत्तहस्तलंकां नमामि तं प्रांजलिरांजनेयम॥११॥म
नोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम॥ वातात्मजं वानरयूथ
मुख्यं श्रीरामदूतं शिरसा नमामि॥१२॥ रामाय रामभद्राय रामचन्द्राय वेध
से रघुनाथाय नाथाय सीतायाः पतये नमः॥१३॥ जयति रघुवंशतिल
कः कौसल्याहृदयनन्दनो रामः॥ दशवदननिधनकारी दाशरथिः पुण्डरी
काक्षः॥१४॥ जितं भगवता तेन हरिणा लोकधारिणा॥ अजेन विश्वरूपे
ण निर्गुणेन गुणात्मना॥१५॥ ॐ तपःस्वाध्यायनिरतं तपस्वी वाग्विदा
वरम॥ नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम॥१॥ कोन्वस्मिन्सा

२

म्प्रतं लोके गुणवान कश्च वीर्यवान ॥ धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढ
व्रतः ॥२॥ चारित्रेण च को युक्तः सर्वभूतेषु को हितः ॥ विद्वान कः कः समर्थ
श्च कश्चैकप्रियदर्शनः ॥३॥ आत्मवान को जितक्रोधो द्युतिमान कोन
सूयकः ॥ कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥४॥ एतदिच्छाम्यहं श्रोतुं
परं कौतूहलं हि मे ॥ महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधन्नरम ॥५॥ श्रुत्वा चैत
त्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ॥ श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्य
मब्रवीत ॥६॥ बहवो दुर्लभाश्चैव ये त्वया कीर्त्तिता गुणाः ॥ मुने वक्ष्याम्यहं
बुध्वा तैर्युक्तः श्रूयतान्नरः ॥७॥ इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ॥

इक्ष्वाकिति ॥ इक्ष्वाकुवंशात्प्रभवः आविर्भावो यस्य सतथा ॥ रामो नाम राम इति नाम्ना प्रसिद्धः जनैः श्रुतः प्रसिद्धे त
स्मिन्नेव एकत्र सर्वे त्वत्पृष्टगुणा अन्ये च गुणा इति शेषः ॥ तच्चेदं यौगिकं नाम रमन्ते योगिनोऽस्मिन ॥ यद्वा
रमयति स्वकानिति योगस्य प्रदर्शनात ॥

॥त ग्रन्थे वीर्य

वा०रा०

३

नारकपुरुषादिवदन्येषामपि दृश्यत इति दीर्घः ॥ तानेव गुणानाह ॥ नियतात्मा नियमितान्तःकरणः
व्याख्यातं ॥ द्युतिः कान्तिः ॥ ०आपत्सम्पदोरविकृतिस्थितिः स्वधृतिः तद्वान् ॥ वशी जिताशेषबहिरिन्द्रियः ॥८॥

नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥८॥ बुद्धिमान्नीतिमान्
वाग्मी श्रीमाञ्छत्रुनिबर्हणः ॥ विपुलांसो महाबाहुः कम्बुग्रीवो महाह
नुः ॥९॥ महोरस्को महेष्वासो गूढजत्रुररिन्दमः ॥ ०आजानुबाहुः सुशि
राः सुललाटः सुविक्रमः ॥१०॥ समः समविभक्ताङ्गः स्निग्धवर्णः प्रताप
वान् ॥ पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥११॥ धर्मज्ञः स
त्यसन्धश्च प्रजानाञ्च हिते रतः ॥ यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः स
माधिमान् ॥१२॥ प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ॥ रक्षिता
जीवलोकस्य धर्मस्य परिरक्षिता ॥१३॥ रक्षिता स्वस्य धर्मस्य स्वजनस्य

धर्मज्ञ इति ॥ सत्यः सुप्रयोगः सत्यसन्धः सकृदेव प्रपन्नाय तवास्मीति च याचते ॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेत्यादि ... प्रतिज्ञापरस्य ॥ यशस्वी रावणवधादिना दिव्ययशः सम्पन्नः ॥ ज्ञानसम्पन्नः ब्रह्मज्ञानपरिपूर्णः ॥ ०शुतरव जदायुषं प्रतिमयात्वं
समनुज्ञातो गच्छ लोकाननुत्तमानिति मुक्तिः सं गच्छते ॥

यः ॥८॥

३

ब्रह्मत्स्यैव ब्रह्मोपदेशे अधिकारात् ॥ विना ब्रह्मोपदेशं अनुत्तमलोकावाप्त्यसंभवात् ॥ न विद्यते उत्तमा येभ्यस्ते अनु
त्तमाः ॥ आत्मानं मानुषं मन्ये रामं दशरथात्मजमित्यादि वचनस्तु मायामात्रमिति अन्यत्र विस्तरः ॥ शुचिः प्रातःस्नानादिना

चरक्षिता ॥ वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥१४॥ सर्वशास्त्रार्थतत्त्व
ज्ञः स्मृतिमान् प्रतिभानवान् ॥ सर्वलोकप्रियः साधुरदीनात्मा विचक्ष
णः ॥१५॥ सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ॥ आर्यः सर्वसम
श्चैव सदैव प्रियदर्शनः ॥१६॥ स च सर्वगुणोपेतः कौसल्यानन्दवर्द्धनः ॥
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥१७॥ विष्णुना सदृशो वीर्ये
सोमवत्प्रियदर्शनः ॥ कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥१८॥
धनदेन समस्त्यागे सत्ये धर्म इवापरः ॥ तमेवं गुणसम्पन्नं रामं सत्यप
राक्रमम् ॥१९॥ ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतं ॥ प्रकृतीनां

व्यवहारनिरीक्षणकाले सौम्यदर्शनः ॥ क्रोधे युद्धकालिके कालाग्निसदृशः परैरधृष्य
॥ क्षमा प्रतीकारसामर्थ्येपि अपकारसहिष्णुता तया पृथिवीतुल्यः ॥१८॥

विष्णुनेति य
था विष्णोर्वि
ष्णुरेव सर्व
स्वरूपस्वत
था विमानु
षोपाधिमे
दात् सर्वत्र सा
दृश्यं दृश्यं
॥ यद्वा विष्णु
ना सदृश इति
अप्रनन्वयाल
ङ्कारः चन्द्रवत्
इति यावत्

पाल्यामा
ध्यासादिना
च आहारादि
जयरा हे
च हानेन च
मायिकशरी
रत्वाद्वेनिसं
बाह्यान्तरशु
द्धः ॥ वश्यः
शिष्याचार्य
देवगुविनी
तः ॥ समाधि
मान् निजतत्त्व
समाधिमा
न् ॥१२॥

वा०रा०
४
न४

हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥२०॥ यौवराज्येन संयोक्तुमैच्छत्प्रीत्या मही
पतिः ॥ तस्याभिषेकसम्भारान्दृष्ट्वा भार्याथ कैकयी ॥२१॥ पूर्वं दत्तवरा देवी
वरमेनमयाचत ॥ विवासनं च रामस्य भरतस्याभिषेचनम् ॥२२॥ स सत्यव
चनाद्राजा धर्मपाशेन संयतः ॥ विवासयामास सुतं रामं दशरथः प्रियम् ॥२३॥
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ॥ पितुर्वचननिर्देशात्कैकेय्याः
प्रियकारणात् ॥२४॥ तं व्रजंतं प्रियो भ्राता लक्ष्मणोनुजगाम ह ॥ स्नेहा
द्विनयसम्पन्नः सुमित्रानंदवर्द्धनः ॥२५॥ भ्रातरं दयितो भ्रातुः सौभ्रा
त्रमनुदर्शयन् ॥ रामस्य दयिता भार्या नित्यं प्राणसमा हिता ॥२६॥ जन

४

शृङ्गेति॥ गंगाकूले वर्त्तमान शृङ्गवेरपुरे स्थितं निषादाधिपतिं प्रियं इष्टं गुहं आसाद्य तत्सहितो लक्ष्मणादि
सहितश्च रामः सूतं रथेन स्वप्राप्तर्थं मार्गं गंगाकूले व्यसर्जयत् परावर्त्तितवान् ॥ २८॥

कस्य कुले जाता देवमायेव निर्मिता॥ सर्वलक्षणसम्पन्ना नारीणामुत्त
मा वधूः॥ २७॥ सीताप्यनुगता रामं शशिनं रोहिणी यथा॥ पौरैरनुगतो
दूरं पित्रा दशरथेन च॥ २८॥ शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत॥ गुह
मासाद्य धर्मात्मा निषादाधिपतिं प्रियम॥ २९॥ गुहेन सहितो रामो ल
क्ष्मणेन च सीतया॥ ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः॥ ३०॥ चित्र
कूटमनुप्राप्य भरद्वाजस्य शासनात॥ रम्यमावसथं कृत्वा रममाणा वने
त्रयः॥ ३१॥ देवगन्धर्वसंकाशास्तत्र ते न्यवसन्सुखम॥ चित्रकूटं गते रामे

गुहेनेति॥ पूर्वार्द्धं पूर्वश्लोकान्वयि ॥ ते सीतारामलक्ष्मणाः वनेन पुरोवर्त्तिप्राप्तवनद्वारेण परं परं
वनं गत्वा॥ ते वनं पादचारत्वेन वनं गत्वेत्यर्थ इति सम्प्रदायः॥ ३०॥

वा०रा० ५

ततः॰ पुत्रस्य भरतस्य राज्याय राज्यरक्षणसामर्थ्यं लब्धुं ॥ ॰ प्रहत्यादौ दृष्टशक्तिका चिन्त्येवं भवत्व
पदस्थे पादुके न्यासरूपेण दत्वा पुनः पुनः इति निवर्तितं याच्यमानं भरतं चतुर्दशसमानन्तरं सर्व
था प्रति निवर्तितव्यमित्यभ्युपेत्य निवर्तयामास ॥ ॰ अस्य तिरज्याय पक्षपावछी ॥

पुत्रशोकातुरस्तथा ॥३२॥ राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ॥ ग
तेतु तस्मिन् भरतो वशिष्ठप्रमुखैर्द्विजैः ॥३३॥ नियुज्यमानो राज्याय ने
च्छद्राज्यं महाबलः ॥ स जगाम वनं वीरो रामपादप्रसादकः ॥३४॥ गत्वा
तु स महात्मानं रामं सत्यपराक्रमं ॥ अयाचद्भ्रातरं राममार्यभाव
पुरस्कृतः ॥३५॥ त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ॥ रामोपि
परमोदारः सुमुखः सुमहायशाः ॥३६॥ न चैच्छत्पितुरादेशाद्राज्यं रा
मो महाबलः ॥ पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः ॥३७॥ निव

दत्वेत्यत्र ॰ पुत्रस्य इत्युक्तसर्वनाम्यं ॥ दत्वेत्यन्वयेपि समुदानस्य शेषत्वविवक्षया षष्ठी त्वन्ये ॥ पुत्रं निक्षेपमुख्यद
नाभावान्न चतुर्थी दत्वेत्यन्वयेपीति तन्न स्वत्वं तु के पाध्या यत्तस्मै च वेहं ददातीति महाभाष्यप्रयोगविरोधात
॥३७॥

रामपाद प्रसादकः पूज्यं रामं प्रसा दयितुं वनं जगाम ॥ पादशब्दः पूज्यवाची ॥३४॥

५

र्जयामास ततो भरतं भरताग्रजः।।सकाममनवाप्यैव रामपाद
वुपस्पृशन ।।३८।।नन्दिग्रामेऽकरोद्राज्यं रामागमनकांक्षया।।ग
ते तु भरते श्रीमान सत्यसन्धो जितेन्द्रियः।।३९।।रामस्तु पुनरालक्ष्य
नागरस्य जनस्य च।।तत्रागमनमेकाग्रो दण्डकान्प्रविवेश ह ।।४०।।
प्रविश्य तु महारण्यं रामो राजीवलोचनः।।विराधं राक्षसं हत्वा शरभं
गं ददर्श ह।।४१।। सुतीक्ष्णं चाप्यगस्त्यं च ऽगस्त्यभ्रातरं तथा।।ऽग
गस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम।।४२।।खड्गं च परमप्रीतस्तू

चापीति निपातसमुच्चयः पद्यपूरकः।। ऽगस्त्यभ्राता इध्मवाहनो नामेति केचित् ।।ऐन्द्रं इन्द्रादगस्त्यस्यागतं शरास
नं धनुर्जग्राह।।पूर्वं भार्गवजिता ततः प्राप्तं यद्वैष्णवं धनुर्भग्न वतारामेल वरुणे न्यस्तं तदिन्द्रेण वरुणादानीया
गस्त्यस्यार्पितमित्यर्थः ऽपारायणकांडे स्फुटं ।।पद्यं इन्द्रो विष्णुः।।४२।।

वा० रा०
६

णी चाक्षयसायकै ॥ वसतस्तस्य रामस्य वने वनचरैः सह ॥४३॥ आव
यो ऽभ्यागमन् सर्वे वधायासुररक्षसाम् ॥ स तेषां प्रतिशुश्राव राक्षसानां त
दा वने ॥४४॥ प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ॥ ऋषीणामग्निक
ल्पानां दण्डकारण्यवासिनां ॥४५॥ तेन तत्रैव वसता जनस्थाननिवा
वासिनी ॥ विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥४६॥ ततः शूर्पणखा
वाक्यादुद्युक्तान् सर्वराक्षसान् ॥ खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ॥४७॥
निजघान रणे रामस्तेषां चैव पदानुगान् ॥ वने तस्मिन्निवसता जनस्थान
निवासिनां रक्षसां निहतान्यासन् सहस्राणि चतुर्दश ॥ ततो ज्ञातिवधं श्रुत्वा

॥४८॥
३

६

श्रमणां तापसीं ॥ धर्मनिपुणां सकलधर्मज्ञां ॥ धर्मचारिणीं नित्यस्यानुसकलधर्मानुष्ठात्रीमित्यर्थः ॥ श्रमणी
मित्यत्र कर्तरि ल्युट् ॥ तपसा श्राम्यतीत्यर्थः ॥ तामभिगच्छेति कथयामास सम्बन्धः ॥५७॥

रदर्शनम् ॥५५॥ तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ॥ स चास्य कथयामास श
वा०रा० वरीं धर्मचारिणीम् ॥५६॥ श्रमणां धर्मनिपुणामभिगच्छेति राघव ॥ सोऽभ्यग
८ च्छन्महातेजाः शवरीं शत्रुसूदनः ॥५७॥ शवर्या पूजितः सम्यग्रामो दशरथा
त्मजः ॥ पंपातीरे हनुमता संगतो वानरेण ह ॥५८॥ हनुमद्वचनाच्चैव सुग्री
वेण समागतः ॥ सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥५९॥ आदितस्त
द्यथावृत्तं सीतायाश्च विशेषतः ॥ सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥६०॥
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ॥ ततो वानरराजेन वैरानुकथ ८
नम्प्रति ॥६१॥ रामायावेदितं सर्वं प्रणयाद्दुःखितेन च ॥ प्रतिज्ञातं च रामेण त

रावणः क्रोधमूर्छितः ॥४८॥ सहायंवरयामास मारीचंनामराक्षसम् ॥ वार्य
माणः सुबहुशो मारीचेन स रावणः ॥५०॥ न विरोधो बलवता क्षमो रावण तेन
ते ॥ अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥५१॥ जगाम सहमारीचस्तस्या
श्रमपदं तदा ॥ तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥५२॥ जहार भार्यां राम
स्य गृध्रं हत्वा जटायुषम् ॥ गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥५३॥ राघवः
शोकसंतप्तो विललापाकुलेन्द्रियः ॥ ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुष
म् ॥५४॥ मार्गमाणो वने सीतां राक्षसं संददर्श ह ॥ कबन्धं नाम रूपेण विकृतं घो

दावालिवधंप्रति॥६२॥वालिनस्तुवलंतत्रकथयामासवानरः॥सुग्रीवःशङ्कि
तश्चासीन्नित्यंवीर्येणराघवे॥६३॥राघवप्रत्ययार्थंतुदुन्दुभेःकायमुत्त
मं॥दर्शयामाससुग्रीवोमहापर्वतसन्निभम॥६४॥उत्स्मयित्वामहावाहुः
प्रेक्ष्यचास्थिमहावलः॥पादाङ्गुष्ठेनचिक्षेपसम्पूर्णंदशयोजनम॥६५॥वि
भेदचपुनःशालान्सप्तैकेनमहेषुणा॥गिरिंरसातलंचैवजनयन्प्रत्ययं
तदा॥६६॥ततःप्रीतमनास्तेनविश्वस्तःसमहाकपिः॥किष्किन्धांरामस
हितोजगामचगुहांतदा॥६७॥ततोगर्जद्धरिवरःसुग्रीवोहेमपिंगलः॥
तेननादेनमहतानिर्जगाममहरीश्वरः॥६८॥अनुमान्यतदातारांसुग्री

कपाच
नतइति ॥ गृध्रस्य संपातेर्वचनात् तस्यां वसतिं वैदेहीं दीनां कौशेयवासिनीं एवंरूपात ॥ सुप्लुवे उल्लङ्घितवान् ॥ इतः सु
न्दरकाण्डसंग्रहः ॥ ७२ ॥ ततो निःशोकवनिकां गतां प्रमदवनस्थितां ध्यायन्तीं राममिति शेषः ॥ ७३ ॥
वेलां समागतः ॥ निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६८ ॥ ततः सुग्रीववचना
वा०रा० द्धत्वा वालिनमाहवे ॥ सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ ७० ॥ स च
८ सर्वान्समानीय वानरान्वानरर्षभः ॥ दिशः प्रस्थापयामास दिदृक्षुर्जन
कात्मजाम् ॥ ७१ ॥ ततो गृध्रस्य वचनात्संपातेर्हनुमान्बली ॥ शतयोजन
विस्तीर्णं पुप्लुवे लवणार्णवम् ॥ ७२ ॥ तत्र लङ्कां समासाद्य पुरीं रावणपालि
ताम् ॥ ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥ ७३ ॥ निवेदयित्वाभि ८
ज्ञानं प्रवृत्तिं विनिवेद्य च ॥ समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७४ ॥ पञ्च
सेनाग्रगान्हत्वा सप्त मन्त्रिसुतानपि ॥ शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ७५ ॥

२पृष्ठेनेति ॥ मदवस्या मोघत्वात्तेनेन बन्धनमात्रं चतुःपंच घटिकानन्तरं पुनर्मोक्ष्येतिबुद्ध्या दत्तवरात् तावता कालेन बुद्ध्वा स्व
मुक्तमात्मानं ज्ञात्वापि यदृच्छया कार्यान्तरप्रसंगेन रावणदर्शनाचपला पश्चिमः बद्धोनेतृन् ततान् राक्षसान्मृतिवीरः हनु

२पृष्ठेनेनानुमुक्तमात्मानं ज्ञात्वा पेता महाद्युतिः ॥ मर्षयन् राक्षसान् वीरो यन्त्रिणः समर्षोत्व
सीतामृ स्तान्यदृच्छया ॥७६॥ ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् ॥ रामाय प्रि मर्षयन्
ते सीतां च यमाख्यातुं पुनरायान्महाकपिः ॥७७॥ सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षि क्षमां कुर्वन् रावण
स्थानप्रदे णम् ॥ न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥७८॥ ततः सुग्रीवसहितो गत्वा समीपं प्राप्तवानिति
शं विना तीरं महोदधेः ॥ समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥७९॥ दर्शयामास चा शेषः ॥
त्मानं समुद्रः सरितां पतिः ॥ समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥८०॥ तेन ग ममर्षेति वा पाठः ॥ ७६ ॥
त्वा पुरीं लङ्कां हत्वा रावणमाहवे ॥ रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥८१॥
तामुवाच ततो रामः परुषं जनसंसदि ॥ २अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥८२॥

सोऽभीति ॥ प्रदक्षिणं प्रदक्षिणादि मुख्यमुपचारं ॥ महात्मानं परमात्मानं ॥ २अमेयात्मा २अपरिच्छेद्यबलबुद्धिधैर्यादिवैभवः
तत्त्वतः ॥ सा वै विलक्षणतसि ॥ दृष्टा सीतेति तत्त्वेन्यवेदयदित्यर्थः ॥ २पृष्टदृष्टेतिपदस्य प्रथमप्रयोगे रामस्य सीतेति
श्रवणे तद्विषय क्रियापदसंशयो माभूदित्यर्थः ॥७८॥

ततः तां अग्निवचनात् विशुद्धभावां निष्पापां प्रतिगृह्य राघवेत्येवं रूपात् ॥ विगतकल्मषां निष्पापां स्व-
यं ज्ञात्वा लोकस्य च तथात्वं प्रख्याप्य सीतामङ्गीचकारेति शेषः ॥ केचित्तु न गृहीतम लोकरामो वचनाच्चेगुरोस्तदेति

ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् ॥ [illegible] पठ्यते ॥ तत्रा

वा॰ रा॰ कर्मणा तेन महता त्रैलोक्यं सचराचरम् ॥ ८३ ॥ सदेवर्षिगणं राघवस्य महात्मनः ॥ बभलामि

८ भौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः ॥ ८४ ॥ अभिषिच्य च लङ्कायां राक्षसेन्द्रं वि- ति पुनरु

भीषणम् ॥ कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८५ ॥ देवताभ्यो वरं प्राप्य समु- क्ते माप

त्थाप्य च वानरान् ॥ अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥ ८६ ॥ भरद्वाजा- ठते ॥१॥ ॥८३॥

श्रमं गत्वा रामः सत्यपराक्रमः ॥ भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ॥ ८७ ॥

पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा ॥ पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥ ८८ ॥

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ॥ रामः सीतामनुप्राप्य राज्यं पुनरवा- ८

प्तवान् ॥ ८९ ॥ प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ॥ निरामयो ह्यरोगश्च दु-

र्भिक्षभयवर्जितः॥८०॥नपुत्रमरणंकेचिद्द्रक्ष्यन्तिपुरुषाःक्वचित॥नार्यश्चावि
धवानित्यंभविष्यन्तिपतिव्रताः॥८१॥नचाग्निजंभयंकिंचिन्नाप्सुमज्जन्ति
जन्तवः॥नवातजंभयंकिंचिन्नापिज्वरकृतंतथा॥८२॥नचापिक्षुद्भयंतत्र
नतस्करभयंतथा॥नगराणिचराष्ट्राणिधनधान्ययुतानिच॥८३॥नित्यंप्रमुदिताः
सर्वेयथाकृतयुगेतथा॥अश्वमेधशतैरिष्ट्वातथाबहुसुवर्णकैः॥८४॥गवांकोट्या
दत्वाविद्वद्भ्योविधिपूर्वकम॥असंख्येयंधनंदत्वाब्राह्मणेभ्योमहायशाः॥८५॥
राजवंशान्शतगुणान्स्थापयिष्यतिराघवः॥चातुर्वर्ण्यंचलोकेस्मिन्स्वेस्वेधर्मे
नियोक्ष्यति॥८६॥दशवर्षसहस्राणिदशवर्षशतानिच॥रामोराज्यमुपासित्वा
ब्रह्मलोकंप्रयास्यति॥८७॥इदंपवित्रंपापघ्नंपुण्यंवेदैश्चसम्मितम॥यःपठेद्रामच

एतदिति ॥ आयुष्यं आयुःकरणं ॥ आख्यानमाख्यायिका ॥ रामोऽयनं प्रतिपाद्यो यस्य तद्रामायणं ॥ सन्धितो
स्तत्वं ॥ गणो दासीदासादयः तैः सह इह ऐहिकान् भोगान् भुक्त्वा प्रेत्य मृत्वा स्वर्गे महीयते स्वर्गिभिः सत्कृतो मोद

रितं सर्वपापैः प्रमुच्यते ॥९८॥ एतदाख्यानमायुष्यं पठन् रामायणं नरः ॥ सपुत्रपौत्रः सातिइत्यर्थः

वा॰रा॰ गणः प्रेत्य स्वर्गे महीयते ॥९९॥ पठन् द्विजो वागृषभत्वमीयात् स्यात् क्षत्रियो भूमिप ॥ पठन्निति हेतो

१० तित्वमीयात् ॥ वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥१००॥

हरिः ॐ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे प्रथमः सर्गः ॥१॥ शता ॥ ८८ ॥

रामं रामानुजं सीतां भरतं भरतानुजम् ॥ सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥ राम ॥

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥ यत्क्रौञ्चमिथुनादेकमवधीः काममो

हितम् ॥१॥ श्रीरामचन्द्राय नमः ॥ श्रीलक्ष्मणाय नमः ॥ श्रीसीतादेव्यै नमः ॥ ० ॥

पठन्निति ॥ द्विजः मुख्यद्विजो ब्राह्मणः पठन् वागृषभत्वं शब्दब्रह्मपारगत्वं प्राप्नुयात् ॥ स्यादिति यद्यर्थे ॥ १०
यदि क्षत्रियः तदा रामायणं पठन् भूपतित्वमाप्नुयात् ॥ पण्यैः क्रेयद्रव्यैः साध्यं मूल्याद् द्विगुणं त्रिगुणं वा ध्यादिरूपं
फलं यस्य तत्त्वं प्राप्नुयात् ॥ धनसमृद्धिं प्राप्नुयादिति फलितोऽर्थः ॥ शूद्रोऽपि जनः त्रैवर्णिकदासः ॥ अत्र श एवनित्य
व्याहारः ॥ महत्त्वं द्विजेतरसर्वप्रजाभ्यः श्रेष्ठत्वं महत्त्वं [illegible] तनवर्णप्राप्तिलक्षणं च [illegible] प्रयात् ॥ पुस्य [illegible] प्रति
पादकत्वध्वननाय [illegible] मा [illegible] ॥१००॥